# *॥ પુરુષ સૂક્તમ ॥*

ૐ તચ્છં ચોરાવૃણીમહે । ગાતું યજ્ઞાય । ગાતું યજ્ઞપતયે । દૈવી સ્વસ્તિરસ્તુ નઃ । સ્વસ્તિર્માનુષેભ્યઃ । ઊર્ધ્વં જિગાતુ ભેષજમ । શં નો અસ્તુ દ્વિપદે । શં ચતુષ્પદે । ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ૐ સહસ્રશીર્ષા પુરુષઃ । સહસ્રાક્ષઃ સહસ્રપાત । સ ભૂમિં વિશ્વતો વૃત્વા । અત્યતિષ્ઠદ્દશાઙ્ગુલમ । પુરુષ એવેદગં સર્વમ । યદ્ભૂતં યચ્ચ ભવ્યમ । ઉતામૃતત્વસ્યેશાનઃ । યદન્નેનાતિરોહતિ । એતાવાનસ્ય મહિમા । અતો જ્યાયાગ્શ્ચ પૂરુષઃ ॥ ૧ ॥

પાદોટસ્ય વિશ્વા ભૂતાનિ । ત્રિપાદસ્યામૃતં દિવિ । ત્રિપાદૂર્ધ્વ ઉદૈત્પુરુષઃ । પાદોટસ્યેહાટટભવાત્પુનઃ । તતો વિશ્વઙ્વ્યક્રામત । સાશનાનશને અભિ । તસ્માદ્વિરાડજાયત । વિરાજો અધિ પૂરુષઃ । સ જાતો અત્યરિચ્યત । પશ્ચાદ્ભૂમિમથો પુરઃ ॥ ૨ ॥

યત્પુરુષેણ હવિષા । દેવા યજ્ઞમતન્વત । વસન્તો અસ્યાસીદાજ્યમ । ગ્રીષ્મ ઈધ્મશ્શરદ્ધવિઃ । સપ્તાસ્યાસન પરિધયઃ । ત્રિઃ સપ્ત સમિધઃ કૃતાઃ । દેવા યદ્યજ્ઞં તન્વાના : । અબધ્નન્પુરુષં પશુમ । તં યજ્ઞં બર્હિષિ પ્રૌક્ષન । પુરુષં જાતમગ્રતઃ ॥ ૩ ॥

તેન દેવા અયજન્તઃ । સાધ્યા ઋષયશ્ચ યે । તસ્માત યજ્ઞાત્સર્વહુતઃ । સંભૃતં પૃષદાજ્યમ । પશૂગસ્તાગશ્ચક્રે વાયવ્યાન । આરણ્યાન ગ્રામ્યાશ્ચ યે । તસ્માત યજ્ઞાત્સર્વહુતઃ । ઋચઃ સામાનિ જજ્ઞિરે । છન્દાગંસિ જજ્ઞિરે તસ્માત । યજુસ્તસ્માદજાયત ॥ ૪ ॥

તસ્માદશ્વા અજાયન્ત । યે કે ચોભયાદતઃ । ગાવો હ જજ્ઞિરે તસ્માત । તસ્માજ્જાતા અજાવયઃ । યત્પુરુષં વ્યદધુઃ । કતિધા વ્યકલ્પયન । મુખં કિમસ્ય કૌ બાહૂ । કાવૂરૂ પાદાવુચ્યેતે । બ્રાહ્મણોટસ્ય મુખમાસીત । બાહૂ રાજન્યઃ કૃતઃ ॥ ૫ ॥

ઊરૂ તદસ્ય યદ્વૈશ્યઃ । પદ્ભ્યાગં શૂદ્રો અજાયત । ચન્દ્રમા મનસો જાતઃ । ચક્ષોઃ સૂર્યો અજાયત । મુખાદિન્દ્રશ્ચાગ્નિશ્ચ । પ્રાણાદ્વાયુરજાયત । નાભ્યા આસીદન્તરિક્ષમ । શીર્ષ્ણો દ્યૌઃ સમવર્તત । પદ્ભ્યાં ભૂમિર્દિશઃ શ્રોતાત । તથા લોકાગં અકલ્પયન ॥ ૬ ॥

વેદાહમેતં પુરુષં મહાન્તમ । આદિત્યવર્ણં તમસસ્તુપારે । સર્વાણિ રૂપાણિ વિચિત્ય ધીરઃ । નામાનિ કૃત્વાઽભિવદન ,  યદાસ્તે । ધાતા પુરસ્તાદ્યમુદાજહાર । શક્રઃ પ્રવિદ્વાન્પ્રદિશશ્ચતસ્રઃ । તમેવં વિદ્વાનમૃત ઈહ ભવતિ । નાન્યઃ પન્થા અયનાય વિદ્યતે । યજ્ઞેન યજ્ઞમયજન્ત દેવાઃ । તાનિ ધર્માણિ પ્રથમાન્યાસન । તે હ નાકં મહિમાનઃ સચન્તે । યત્ર પૂર્વે સાધ્યાઃ સન્તિ દેવાઃ ॥ ૭ ॥

અદ્ભ્યઃ સંભૂતઃ પૃથિવ્યૈ રસાચ્ચ । વિશ્વકર્મણઃ સમવર્તતાધિ । તસ્ય ત્વષ્ટા વિદધદ્રૂપમેતિ । તત્પુરુષસ્ય વિશ્વમાજાનમગ્રે । વેદાહમેતં પુરુષં મહાન્તમ । આદિત્યવર્ણં તમસઃ પરસ્તાત । તમેવં વિદ્વાનમૃત ઈહ ભવતિ । નાન્યઃ પન્થા વિદ્યતેઽયનાય । પ્રજાપતિશ્ચરતિ ગર્ભે અન્તઃ । અજાયમાનો બહુધા વિજાયતે ॥ ૮ ॥

તસ્ય ધીરાઃ પરિજાનન્તિ યોનિમ । મરીચીનાં પદમિચ્છન્તિ વેધસઃ । યો દેવેભ્ય આતપતિ । યો દેવાનાં પુરોહિતઃ । પૂર્વો યો દેવેભ્યો જાતઃ । નમો રુચાય બ્રાહ્મયે । રુચં બ્રાહ્મં જનયન્તઃ । દેવા અગ્રે તદબ્રુવન । યસ્ત્વૈવં બ્રાહ્મણો વિદ્યાત । તસ્ય દેવા અસન વશે ॥ ૯ ॥

હ્રીશ્ચ તે લક્ષ્મીશ્ચ પત્ન્યૌ । અહોરાત્રે પાર્શ્વે । નક્ષત્રાણિ રૂપમ । અશ્વિનૌ વ્યાત્તમ । ઈષ્ટં મનિષાણ । અમું મનિષાણ । સર્વં મનિષાણ ॥ ૧૦ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥